International Journal of Sanskrit Research 2017; 3(3): 92-94

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(3): 92-94
© 2017 IJSR
www.anantaajournal.com
Received: 25-03-2017
Accepted: 26-04-2017

**Pragya**
Research Student, Department of Sahitya, Rastriya Sanskrit Sansthan, Ved Vyas Campus, Balahar, Kangra, H.P., India

**Correspondence**
**Pragya**
Research Student, Department of Sahitya, Rastriya Sanskrit Sansthan, Ved Vyas Campus, Balahar, Kangra, H.P., India

# कतिपयपाणिनीयसूत्रोदाहरणार्थविमर्शः

**Pragya**

## प्रस्तावना

पाणिनेः मुख्यः ग्रन्थः अष्टाध्यायीनामकः संक्षिप्तरूपेण सूत्रशैल्यां विरचितः, अयं संस्कृतस्य सर्वोत्कृष्टो व्याकरणग्रन्थोऽस्ति। अस्मिन् लौकिकशब्दैः सह वैदिकशब्दानामपि अन्वाख्यानमस्ति। प्राचीनकालादेव संक्षिप्तसूत्रेषु ग्रथितत्वादष्टाध्याय्याः व्याख्याया अपेक्षासीत्। पाणिनीयव्याकरणस्य पठनपाठने प्रचलित्वात् अनेका व्याख्याः काशिकावृत्ति-भाषावृत्ति-प्रभृतयो विरचिता अभूवन्। सम्प्रति काशिकावृत्तिरेव सर्वासु वृत्तिषु प्रामाणिकी प्राचीना च रचनेति विद्वद्भिः स्वीक्रियते। 'भाषावृत्तिः' इत्यस्य व्याख्यायां सृष्टिधराचार्यः काशिकाशब्दार्थं स्पष्टयति-'काशयति प्रकाशयति सूत्रार्थमिति काशिका'। काशिकागतसूत्रोदाहरणानामर्थं विशदीकर्तुं एतासां वृत्तीनां महती उपयोगिता वर्तते।

व्याकरणशिक्षणं सरलं सरसञ्चापादयितुं कानिचिद् व्याकरणोदाहरणकाव्यानि निर्मितानि सन्ति। व्याकरणोदाहरणकाव्यानामनुशीलनेन उदाहरणार्थविषये विशेषेण स्पष्टता विशदता च जायते। यतो हि तत्र उदाहरणप्रयोगो विविधरूपेण दृश्यते। उदाहरणकाव्यान्याश्रित्य प्राचीनग्रन्थगतं विवरणं चाश्रित्य इह कानिचिद् सूत्रोदाहरणानि प्रस्तूयन्ते-

१.'वञ्चेर्गतौ'[१] इत्यनेन सूत्रेण वञ्चेरङ्गस्य गतौ वर्तमानस्य कवर्गादेशो न भवति। 'वञ्च्यं वञ्चन्ति वणिजः', गन्तव्यं गच्छन्तीत्यर्थः- इति मुद्रितकाशिकापुस्तकेषु वञ्च्यमिति पठ्यते। अपपाठ एवायम्। बृहद्वृत्तौ गणरत्नमहोदधौ च वञ्चमित्येव पाठो निम्नरूपेण श्लोकगतो दृश्यते-

पश्यैते व्याधवार्केण्यसङ्कुले वित्तवत्तमाः।
रात्रावपि महारण्ये वञ्चं वञ्चन्ति वाणिजाः।।[२]

अन्यत्रापि अपपाठः, यथा- भाषावृत्तौ - वञ्च्यं वञ्चन्ति। गन्तव्यं यान्तीत्यर्थः[३]। व्याकरणसिद्धान्तसुधानिधौ- वञ्चु गतिप्रलम्भनयोः- वञ्च्यम्। गतौ तु वङ्क्यं काष्ठम्। कुटिलीकृतमित्यर्थः[४]। प्रक्रियासर्वस्वे - वञ्च्यम्। कौटिल्यार्थे वङ्क्यम्[५]। कतिपय-उदाहरणकाव्येषु वञ्चमित्यस्य प्रयोगा अपि उपलभ्यन्ते यथा-

**द्व्याश्रयमहाकाव्ये-**

न्यङ्कुवञ्चमभिवञ्चति सैन्ये मेघवृष्टिवदटव्यनुयाजैः।।[६]
न्यङ्कुर्मृगभेदस्य वञ्चो गमनं गच्छति।

**वासुदेवविजये-**

शुष्कपेषं यवान् पिष्ट्वा प्रणिप्सादुपपावके।
शीतालु तक्षायस्कारमवृतत्यक्तवञ्चकम्।।[७]
त्यक्तवञ्चकम्- त्यक्तसंचारकम्।

२. 'कृच्छगहनयो कषः'[८] इत्यनेन सूत्रेण कृच्छ गहन इत्येतयोरर्थयोः कषेर्धातोर्निष्ठायामिडागमो न भवति। कष्टोऽग्निः, कष्टं व्याकरणम्। ततोऽपि कष्टतराणि सामानि। गहने- कष्टानि वनानि। कष्टा पर्वताः। कृच्छ्रं दुःखम्, तत्कारणमप्यग्न्यादिकं कृच्छ्रमुच्यते। 'स्यात्कष्टं कृच्छ्रमाभीलम्' इत्यमरः[९]। सामान्यरूपेण अग्निशब्देन भौतिकोऽग्निः गृह्यते परमत्र कष्टोऽग्निः इत्यनेन अग्नि-ग्रन्थः अभिप्रेतोऽस्ति। डा० वासुदेवशरण अग्रवालोऽपि - 'विद्यार्थी के छात्र जीवन में नियम और व्यवस्था का मुख्य स्थान था। अध्ययन की कठिनाई प्रकट करने वाले शब्द भी मिलते है, जैसे कष्टोऽग्निः, कष्टं व्याकरणम्, ततोऽपि

कष्टतराणि सामानि, अर्थात् - अग्नि ग्रन्थ (शतपथ काण्ड ६-९) का अध्ययन कठिन है। इन दोनों से कठिन साम गान का सीखना है'(कृच्छगहनयोः कषः ७.२.२२,काशिका ) । अत्रागतमग्निशब्दं स्पष्टीकुर्वन्नन्यत्र वर्णयति यत् - काण्ड ६-७-८-९ का संबन्ध अग्निचयन से है। उनमें शाण्डिल्य आचार्य का प्रमाण विशेष रूप से आता है। ये चार काण्ड 'अग्नि' कहलाते थे और उनका अध्ययन अलग किया जाता था। ९

३.'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति'[१०] काशिकावृत्तौ सूत्रस्योदाहरणमस्ति विशिष्टमेकम्- पञ्चार्मम्। पञ्चानामर्माणां विनष्टग्रामाणां समाहारो भवति पञ्चार्मम्। एवं दशार्ममपि। अर्मशब्दविषये वासुदेवशरण-अग्रवालः लिखति- 'विदित होता है किसी समय अर्मान्त नामों का विशेष प्रचार था। बौधायन श्रौतसूत्र के अनुसार ऊजड गाँव को अर्म कहते थे (शून्य ग्राम, विनष्टग्राम, बौ०श्रौ० ९.१,९.३)। सरस्वती के उत्तर में स्थूलार्म नामक एक ह्रद का वर्णन है जहाँ के जंगल में सौ गायों का वंश बढते-बढते एक सहस्र हो गया था (तांड्य१५.१०.१८)। पाणिनि ने सूत्र में इतने अर्मान्त नामों का उल्लेख किया है- भूतार्म, अधिकार्म, संजीवार्म, मद्रार्म, अश्मार्म, कंजलार्म। तैत्तिरीय ब्राह्मण में भी अर्म शब्द आया है (३.४.१.९)। ऋग्वेद में अर्मक (१.१३३.३)और यजुर्वेद (३०.११)में अर्म खंडहर या ऊजड स्थानों के लिए प्रयुक्त हुए हैं। इस प्राचीन शब्द का प्रयोग कालांतर में भाषा से लुप्त हो गया । हो सकता है यह मूल शब्द म्लेच्छ भाषा का हो। म्लेच्छ (सेमेटिक)परिवार की अर्माइक भाषा में 'अरम ऊबड-खाबड पथरीले पहाडी प्रदेश को कहते है। अर्माइक उन लोगों की भाषा थी जो 'अरम या पर्वतीय प्रदेशों के निवासी थे[११]। अथ प्रयोगाः-

**ऋग्वेदे-**

वैलास्थानके अर्मके महावैलास्थे अर्मके ।।[१२]

**यजुर्वेदे-**

अर्मेभ्यो हस्तिपं जवायाश्वपं पुष्ट्यै गोपालं वीर्यायाविपालं ०।[१३]

**अष्टाध्यायी सूत्रप्रयोगदीपिकायाम्-**

पञ्चार्मेऽस्मिन् पुरा देशे दुष्कालोऽभवदेकदा।
दशार्मे तत्र राष्ट्रे तु द्विर्दुष्कालोऽभवत्पुरा।।[१४]

४.'घुषिरविशब्दने'[१५] इत्यनेन सूत्रेण घुषेर्धातोरविशब्दनेऽर्थे निष्ठायामिडागमो न भवति। न्यासकारस्य मतेन तु 'विशब्दनं प्रतिज्ञानं स्वाभिप्रायस्य शब्देनाविष्करणमित्यर्थः'[१६]। घुष्टा रज्जुः। घुष्टौ पादौ। डा०प्रभुदयाल-अग्निहोत्री स्वरचितपुस्तके 'पतञ्जलिकालीनभारते' ज्ञापयति यत् -''बटने के बाद रज्जु काष्ठ स्तम्भ में रगडकर चिकनी की जाती थी और तब वह संघुष्ट या संघुषित हो जाती थी। इसके बाद दुबारा ऐंठकर वह तिलडी की जाती थी और तब उससे पानी खींचा जाता था''[१७]।'उच्चैर्घुष्टं तु घोषणा' इत्यमरः[१८]। विस्पष्टार्थमन्याभ्योऽपि वृत्तिभ्योऽर्थोदाहरणानि प्रस्तूयन्ते। यथा -

प्रक्रियासर्वस्वे - घुष्टा घण्टा । घुष्टो गजेन वृक्षः। निघृष्ट इत्यर्थमाह शङ्करः। अन्यत्र अवघुषितं वाक्यम्। आविष्कृताभिप्रायमित्यर्थः[१९]। भाषावृत्तौ- घुष्टा रज्जुः 'शस्त्रघुष्टकरान्'। उद्घुष्टोऽयमर्थः। 'उद्घुष्टं परपुष्टया'। अविशब्देन इति किम्? अवघुषितं वाक्यमाह। अशास्त्रीयमित्यर्थः[२०]। माधवीयधातुवृत्तौ-......विशब्दनं प्रतिज्ञानम्, तच्च शब्देन स्वाभिप्रायप्रकाशनमिति न्यासे। 'अस्मादप्यस्मिन्नर्थे यथाप्रयोगमयं धातुर्वर्त्तते' इति पुरुषकारे। सर्वत्रक्षीरस्वामिधनपालभागवृत्तिकारा घुषिं शब्दार्थं पेठुः। चन्द्रदुर्गौ तु अविशब्दमपहाय 'शब्दे' इत्येवं पेठतुः। 'घृषु शब्दे' इति पठन् शाकटायनोऽप्यत्रैवानूकुलः[२१]। बृहद्वृत्तौ- घुष्टा रज्जुः संबद्धावयवेत्यर्थः। घुष्टवान्[२२]।

अथ प्रयोगाः-

**भट्टिकाव्ये-**

तान् दृष्ट्वातिदृढान् धृष्टान् प्राप्तान् परिवृढाज्ञया। कष्टं विनर्दतः क्रूरान् शस्त्र**घुष्ट**करान् कपिः।।[२३]
शस्त्रघुष्टकरान् शस्त्रघर्षणैर्घुष्टकरान् शब्दायमानपाणीन्।

**अर्जुनरावणीये-**

किं न वेद्मि रज्जुबन्धेन **घुष्टानहं** तस्य तान् भुजान्।।[२४]

**द्व्याश्रयमहाकाव्ये-**

कष्टः पुमान्**घुष्ट**गुणावबद्धातिकष्टकेशो घुषितानि कुर्वन्।।[२५]
घुष्टेन-संबद्धावयवेन निबिडेनेत्यर्थः।

**वासुदेवविजये-**

अयस्सधर्माणमजोऽस्य वक्त्रे स कम्बुघुष्टं बहुकन्दरायाम्।
अवीविशद्दोषमसृग्भिरङ्गं निसोष्यतोऽथो विषसाद दैत्यः।।[२६]
कम्बुघुष्टम्- शंखघुष्टम्।

५. 'आसन्दीवदष्ठीवच्चक्रीवत् कक्षीवद् रुमण्वच्चर्मण्वती'[२७] इत्यस्मिन् सूत्रे आसन्दीवद् अष्ठीवत् चक्रीवद् कक्षीवद् रुमण्वत् चर्मण्वती इत्येतानि संज्ञायां निपात्यन्ते। आसन्दीवदिति आसनशब्दस्या- सन्दीभावो निपात्यते। आसन्दीवान् ग्रामः। आसन्दीवदहिस्थलम्। आसनवानित्येवान्यत्र। अपरे त्वाहुः- आसन्दीशब्दोऽपि प्रकृत्यन्तरमेवास्ति, तथा चोक्तम्- औदुम्बरी राजासन्दी भवति (श० ब्रा०- ३.३.४.२६,२७) इति। तस्य 'संज्ञायाम् इति वत्वेन सिद्धम्, आसन्दीवदित्येतत् प्रपञ्चार्थमिह पठ्यते।

अष्ठीवदिति अस्थ्नोऽष्ठीभावः। अष्ठीवानिति शरीरैकदेशसंज्ञा। अस्थिमानित्येवान्यत्र।

चक्रीवदिति चक्रशब्दस्य चक्रीभावो निपात्यते। चक्रीवान्। चक्रवानित्येवान्यत्र। चक्रीवन्ति सदो हविर्धानानि (का०श्रौ०-२४.३.२६) भवन्तीत्येतत् तु छान्दसत्वाद् अनुगन्तव्यम्।

कक्षीवदिति कक्ष्यायाः संप्रसारणं निपात्यते। कक्षीवान् नाम ऋषिः। कक्ष्यावानित्येवान्यत्र।

रुमण्वदिति लवणशब्दस्य रुमण्भावो निपात्यते। लवणवानित्येवान्यत्र।

अपरे त्वाहुः- रुमन्निति प्रकृत्यन्तरमस्ति, तस्यैतद् निपातनं नकारलोपाभावार्थम्, मतोर्वा नुडर्थमिति।

चर्मण्वतीति चर्मणो नलोपाभावो णत्वं च निपात्यते, मतोर्वा नुडागमः। चर्मण्वती नाम नदी। चर्मवतीत्येवान्यत्र।

प्रक्रियासर्वस्वे- आसनवत्वादासन्दीवान्नाम ग्रामः। कक्ष्यावानिति प्राप्ते कक्षीवान्नायर्षिः[२८]। चान्द्रवृत्तौ - अष्ठीवान् शरीरैकदेशः। चक्रीवान्- गर्दभः। 'चक्रीवन्तुस्तु बालेया रासभः गर्दभाः खराः'इत्यमरः[२९]। रुमण्वान् नाम पर्वतः[३०]। डा०वासुदेवशरण अग्रवालः ज्ञापयति - ''आसन्दी प्राचीन वैदिक शब्द था। अष्टाध्यायी में आसन्दीवत् शब्द है जो जनमेजय की राजधानी थी। वहाँ राजकीय आसन्दी या गद्दी होने के कारण उसका यह नाम पडा''[३१]। पदमञ्जर्यामपि -

आसन्दीवति धान्यादं रुक्मिणं हरितस्रजम् ।
अश्वं बबन्धं सारङ्गं देवेभ्यो जनमेजयः ।। इति[३२]

अथ प्रयोगाः-

**ऋग्वेदे -**

अष्ठीवन्तौ परि कुलौ च देहत् ।[३३]
(अष्ठीवन्तौ) जानुनी कुल्फौ गुल्फौ इति सायणः।
कक्षीवते अरदतं पुरन्धिम् ।[३४]
(कक्षीवते) प्रशस्तशासनयुक्ताय इति दयानन्दः।

**शतपथब्राह्मणे-**

आसन्दीवति धान्यादं रुक्मिणं हरितस्रजमाबध्नादश्वम् ।[३५]

**महाभारते-**

ततो ज्येष्ठो जामदग्नयो रुमण्णवान्नाम नामत:(आजगाम)।[३६]

'चर्मण्वती तथा चैव पर्णाशा च महानदी '।[३७]

**माघे-**

शैलोपशल्यनिपतद्रथनेमिधारानिष्पिष्टनिष्ठुरशिलातलचूर्णगर्भा:।

भूरेणवो नभसि नद्धपयोदचक्राश्चक्रीवदङ्गरुहधूम्ररुचो विसस्रु:।।[३८]

चक्रवद्भ्रमणमस्यास्तीति चक्रीवान्।

**द्व्याश्रयमहाकाव्ये-**

चर्मण्वतीकर्तृसदृग्रुमण्वदुत्तुङ्ग कक्षीवदनल्पधर्मन्।

युक्तं नताष्ठीवदिलेश शंभुराभीरचक्रीवति यन्न्यदिक्षत्।।[३९]

चर्मण्वती नदी तस्या: कर्ता रन्तिदेव:। तेन हि गोमेधयाग: कारित:। तत्र चानेकगोवधेन गोरक्तैर्नदी प्रवर्तिता। तस्याश्चानेकगोचर्मयुक्तत्वेन चर्मण्वतीति नाम प्रसिद्धम्। लवणमस्यास्ति रुमण्वान्नाम-पर्वतस्तद्वदुत्तुङ्गोन्नताशय:। तथा हे कक्षीवदनल्पधर्मन्। कक्ष्याशब्दो योपान्त्य: सादृश्योद्योगयोर्वर्तते। कक्ष्या धर्मोद्योगोस्यास्ति कक्षीवान्नामर्षिस्तद्वत्प्रभूतधर्म:। तथास्थीनि सन्त्येषामष्ठीवन्तो जङ्घोरुसंधयो नता अष्ठीवन्तो येषां ते तथेलेषा यस्य तत्संबोधनं हे प्रणम्रानेकभूप। आभीर आभीरजातिग्राहरिपुश्चक्रं मण्डलं मेहनान्तेस्यास्ति चक्रीवान् गर्दभ आभीर एवान्यायित्वेन निन्द्यत्वाच्चक्रीवांस्तस्मिन्विषये शंभुर्यदनुशासनं न्यदिक्षत्तद्युक्तम्।

**वासुदेवविजये-**

अभ्यर्णं तस्य वर्तिष्णुर्देशस्य ध्वान्तसन्निभ:।

साहाय्य रसिकानेक धृष्टचक्रीवदावृत:।।[४०]

चक्रीवदावृत: चक्रीवद्भि: खरै: आवृत:।

## संदर्भ ग्रंथ सूची


१. अष्टाध्यायी - ७.३.६३

२. बृहद्वृत्ति- १.११३

३. भाषावृत्ति – ७.३.६३

४. व्याकरणसिद्धान्तसुधानिधि -७.३.६३

५. प्रक्रियासर्वस्व-२५२

६. द्व्याश्रयमहाकाव्य-८.१०५

७. वासुदेवविजय-६.१३०

८. अष्टाध्यायी- ७.२.२२

९. अमरकोष – १.९.३

१०. पाणिनिकालीनभारत-पृ०सं० -२८३,३२१

११. अष्टाध्यायी- ८.२.२

१२. पाणिनिकालीनभारत-पृ०सं०-८०

१३. ऋग्वेद-१.१३३.३

१४. यजुर्वेद-३०.११

१५. अष्टाध्यायी-सूत्रप्रयोगदीपिका-८.२.२

१६. अष्टाध्यायी- ७.२.२३

१७. अष्टाध्यायी- ७.२.२३

१८. पतंजलिकालीनभारत-पृष्ठसं०-१९४

१९. अमरकोष – १.६.१२

२०. प्रक्रियासर्वस्व -५७९

२१. भाषावृत्ति – ७.२.२३

२२. माधवीया धातुवृत्ति- धातुसंख्या-४२४

२३. बृहद्वृत्ति- ४.४.६९

२४. भट्टिकाव्य- ९.१८

२५. अर्जुनरावणीय-२५.१५

२६. द्व्याश्रयमहाकाव्य-१०.५४

२७. वासुदेवविजय-७.६६

२८. अष्टाध्यायी- ८.२.१२

२९. प्रक्रियासर्वस्व -१८११

३०. अमरकोष -२.१.७७

३१. चान्द्रवृत्ति-६.३.३९

३२. पाणिनिकालीनभारत –पृ.सं.-१४६

३३. काशिका-पदमञ्जरी -८.२.१२

३४. ऋग्वेद - ७.५०.२

३५. ऋग्वेद -१.११६.७

३६. शतपथब्राह्मण -१३.५.४.२

३७. महाभारत –वनपर्व -११६.१०

३८. महाभारत-सभापर्व -९.२१

३९. माघ -५.८

४०. द्व्याश्रयमहाकाव्य -२.६२